श्मः त्यदादीनांदकारस्यमत्वंभवतिस्यादौपरे इमौ इमे सर्वा
दित्वाजसी इमं इमौ इमान् अनटौसोः इदमोअनादेशोभवति
टौसोःपरयोः अनेन स्यः इदमः मकारेभकारेचपरेअकारो
भवति कृत्स्नस्य अद्धीत्यात्वे आभ्यां भिसःभिसि इदमदसो
भिस्भिसेवभवति नमकारस्याकारः बस्मिबहुत्वे एभिः अ ३९

सर्वादेः स्म ट   उ० सि र तु अतः

सै स्याभ्यां ए भ्यः अस्मात् आभ्यां ए भ्यः अस्य अनयोः एषां अस्मि
न् अनयोः एषु त्यदादीनामेरभावः किमुशब्दस्य त्यदादेर्द्वेरात्स्मा
द्वाविति सर्वव्याकारोरक्ते न सर्वशब्दवद्रूपं ज्ञेयं कः कौ के कं कौ कान् के
केन काभ्यां कैरित्यादि धकारान्तस्तनवबुधशब्दः तस्य रसेपदा
नेच आदिजवानामिति बभकारस्य भकारः वावसाने नवभु
त् नवभुद् नवबुधौ नवबुधः हे नवभुत् हे नवभुद् नवबुधं
यं नवबुधौ नवबुधः नवबुधा नवभुद्भ्यां नवभुद्भिः नवबुधे
नवभुद्भ्यां नवभुद्भ्यः नवबुधः नवबुधोः नवबुधां नवबुधि
नवबुधः नवभुद्भ्यां नवभुद्भ्यः

सा० ३७ तनक्षुषोः तनक्षुषां तनक्षुषि तनक्षुत्सु तनभुत्सु जकारांतः सं 48

म्राजशब्दः छशषराजादेः षः छकारांतस्य शकारांतस्य षकारांत

स्य च राज् सृज् मृज् भ्राजादेश्च षत्वं भवति धातोर्झसे परे नाम्नश्च स्वर

सेपदांते च षस्य षत्वे डत्वनिषेधार्थः षोडः षकारस्य डत्वं भवति धा

तोर्झसे परे नाम्नश्च स्वरे सपदांते च वावसाने इति टकारः सम्राट् स

म्राड् सम्राजौ सम्राजः हे सम्राट् हे सम्राड् सम्राजं सम्रा

जौ सम्राजः सम्राजा सम्राड्भ्यां सम्राड्भिरित्यादि एवं विरा

जादयः दकारांतास्तद् तद् यद् एतद् शब्दास्त्यदादेष्टेरत् ३७

दाविति सर्वत्राकारे कृते सर्वशब्दवद्रूपं नेयं स्यः त्यदादेस्तकारस्य 49
सौ परे सत्वं भवति स्यः त्यौ त्ये त्यं त्यौ त्यान् त्येन त्याभ्यां त्यैः त्यस्मै त्या-
भ्यां त्येभ्यः त्यस्मात् त्याभ्यां त्येभ्यः त्यस्य त्ययोः त्येषां त्यस्मिन् त्य-
योः त्येषु सः तौ ते तं तौ तान् तेन ताभ्यां तैः तस्मै ताभ्यां तेभ्यः
तस्मात् ताभ्यां तेभ्यः तस्य तयोः तेषां तस्मिन् तयोः तेषु यः
यौ ये यं यौ यान् येन याभ्यां यैः यस्मै याभ्यां येभ्यः यस्मा-
त् याभ्यां येभ्यः यस्य ययोः येषां यस्मिन् ययोः येषु एषः
एतौ एते [illegible] एतदस्त्वादेशो हिनी याटौसो नो वा वक्तव्यः उकारस्य

सा॰ पुनरुक्तिरन्वादेशः एतंवा एनं एतौ एनौ एतान् वा एनान् एते 50
३८ नवा एनेन एताभ्यां एतैः एतस्मै एताभ्यां एतेभ्यः एतस्मात्
एताभ्यां एतेभ्यः एतस्य एतयोः वा एनयोः एतेषां एतस्मिन्
एतयोःवा एनयोः एतेषु ककारांतस्तत्त्वप्राङ्क्शब्दः क्रुषाघटादेः जा
घः घोड्ः वावसाने तत्त्वप्राट् तत्त्वप्राड् तत्त्वप्राञ्चौ तत्त्वप्राञ्चः।
तत्त्वप्राञ्चं तत्त्वप्राञ्चौ तत्त्वप्राञ्चः तत्त्वप्राञ्चा तत्त्वप्राड्भ्यां तत्त्वप्रा।
ड्भिरित्यादि थकारांतो अग्निमथ्शब्दः वावसाने अग्निमत् अ
ग्निमद् अग्निमथौ अग्निमथः हे अग्निमत् हे अग्निमद् अग्निम। ३८

61

थे अग्निमथो अग्निमथः अग्निमथा अग्निमद्भ्यां अग्निमद्भिः अग्नि
मथे अग्निमद्भ्यां अग्निमद्भ्यः अग्निमथः अग्निमद्भ्यां अग्निमद्भ्यः ।
अग्निमथः अग्निमथोः अग्निमथां अग्निमथि अग्निमथोः
अग्निमत्सु वकारांतः प्रत्यञ्च्शब्दः
प्रेचेः पंचसु नुमागमो वक्तव्यः प्रत्यन्च् सि इति स्थिते स्तोःश्चुभिश्चु
कारस्य३ रिति चुत्वे नंञकारः संयोगांतस्य लोपः चोः कुः चवर्गस्य कवर्
गादेशो भवति धातोर्उ सुपरे नाम्नस्वरे सुपदांते च यथासंख्ये
न प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः हे प्रत्यङ् प्रत्यञ्चं प्रत्यञ्चौ प्रे च

रलोपोदीर्घश्च अन्त्वरकारस्य लोपो भवति पूर्वस्य च दीर्घः शसादौ
स्वरे परे नद्धित ईपीकारेच निमित्ताभावे नैमित्तिकस्याप्यभावः
प्रतीचः प्रतीचा प्रत्यग्भ्यां प्रत्यग्भिः प्रतीचे प्रत्यग्भ्यां प्रत्यग्भ्यः
प्रतीचः प्रत्यग्भ्यां प्रत्यग्भ्यः प्रतीचः प्रतीचोः प्रतीचां प्रती
चि प्रतीचोः प्रत्यक्षु सम्यङ् सम्यञ्चौ सम्यञ्चः सम्यञ्चं स
म्यञ्चौ समीचः समीचा सम्यग्भ्यां सम्यग्भिः समीचे सम्यग्भ्यां
सम्यग्भ्यः समीचः सम्यग्भ्यां सम्यग्भ्यः समीचः समीचोः
समीचां समीचि समीचोः सम्यक्षु एवं तिर्यंच तिर्यङ् ति

र्यञ्चौ तिर्यञ्चः तिर्यञ्चं तिर्यञ्चौ तिरश्चादयः तिरश्चाद० 53
योनिपातेन शसादावेरपरे नहितेर्ईपीकारेव तिरश्चः ति
रश्चा तिर्यग्भ्यामित्यादि उदङ् उदञ्चौ उदञ्चः उदञ्चं उदञ्चौ
उदई उदीचः उदीचा उदग्भ्यां उदग्भिः उदीचे उदग्भ्यां उद० दे
ग्भ्यः उदीचः उदग्भ्यां उदग्भ्यः उदीचः उदीचोः उदीचां उदी० ङी
चि उदीचोः उदक्षु हेउदङ् हेउदञ्चौ हेउदञ्चः नकारान्तो
महत्शब्दः महान् महान्तौ महान्तः हेमहन् हेम०
हद्दत्यादि एवमग्निचित्प्रभृतयः नकारान्तउकारान्तुवंयो

सा॰ महत्शब्दः ऋतोनुम् उकारानुबंधस्य ऋकारानुबंधस्य च नुमागमो
५४॰ भवति घुटिपंचमपरेषु न्संमहतोयोदीर्घः शौच न्संतस्याघुटा॰
हृस्यमहच्छब्दस्य च दीर्घोभवति पंचमयिवर्जितेषुशौपरे सं॰
योगांतस्यलोपः महान् महांतौ महांतः हेमहन् महांते महां
तौ महतः महता क्रमेणवाः महद्भ्यां महद्भिः महते महद्भ्यां
महद्भ्यः महतः महद्भ्यां महद्भ्यः महतः महतोः महतां मह
ति महतोः महत्सु नकारांतउकारानुबंधोभवच्छब्दः अवं॰
सोःसौ अवंतस्यांसंतस्य च दीर्घोभवति पिवर्जितेसौपरे भवा ५४॰

54

न् भवंतौ भवंतः हेभवन् भवंते भवंतौ भवतः भवता भव 55
द्भ्यां भवद्भिः भवते भवद्भ्यां भवद्भ्यः भवतः भवद्भ्यांभवद्भ्यः
भवतः भवतोः भवतां भवति भवतोः भवत्सु ऋकारानुबंध
स्यभवतृशब्दस्यनुमागमएवनदीर्घः भवन् भवंतौ भवंतः हे
भवन् भवंते भवंतौ भवतः भवता भवद्भ्यां भवद्भिरित्यादि
एवंपचतृशब्दः [illegible] पचन् पचंतौ पचंतः हेपचन् पचं
ते पचंतौ पचतः पचता पचद्भ्यां पचद्भिरित्यादि पठन् प
ठंतौ पठंतः हेपठन् पठंते पठंतौ पठतः पठता पठद्भ्यां

सा॰
५१

षड्भिरित्यादि शकारांतो विश्शब्दः क्वशोषतिषत्वेडत्वेच षोडेः 56

वावसाने चपस्त्व विट् विड् विशौ विशः हेविट् विशं विशौ

विशः विशा विड्भ्यां विड्भिरित्यादि षकारांतः षष्शब्दो नित्यं

बहुवचनांतः त्रिषुसरूपः जश्शसोर्लुक् षोडः षट् षड् ष

ड्भिः षड्भ्यः स्रड्ति नुट् षडनामड्तिस्थिते ड्ड्ः संख्यासंत्वेपि

नोडकारस्य णत्वंभवति नामिपरे ष्टुभिष्टुः षण्णां षट्सु क्वचि

दपदांतेपिपदांतताश्रयणीया दोषोरः दोषसजुषस्त्राशिषुः

हविष्प्रभृतीनां षकारस्य रेफोभवति रसेपदांतेच दोः दोषौ ५१

दोषः हेदोः दोषौ दोषो शसादौ हेरेणो नतनावक्तव्यः दोषः दोष्णः दो 57
ष्णा दोष्णा दोर्भ्यां वेष्णोः दोष्णि दोषणि दोषिरित्यादि सजुषा
शिषो रसेपदांते च दीर्घो वक्तव्यः सजूः सजुषौ सजुषः हे सजूः स
जुषं सजुषौ सजुषः सजुषा सजूर्भ्यां सजूर्भिरित्यादि सकारां
तः पुंस्शब्दः पुंसोसुङ् पुंसशब्दस्य पंचसु स्थानेषु ङादेशो भवति ङ
कारोत्यादेशार्थः पुमस्सि इति स्थिते उगितानम इति नुमागमः
न्स्महतोर्नोपधादीर्घः योच संयोगान्तस्य लोपः पुमान् पुमांसौ पु
मांसः हे पुमन् पुमांसं पुमांसौ पुंसः पुंसा पुंभ्यां पुंभिः पुं

स्वा० से पुंभ्यां पुंभ्यः पुंसः पुंभ्यां पुंभ्यः पुंसः पुंसोः पुंसाम् पुंसि पुंसोः
५२ पुंसु असंभवे पुंसः ककौ वेदानैकके यस्मात्मनो बहूनां संभवे वा देशे
सपाहस्य कगागमो भवति हपिपरे स्कोराद्योश्च संयोगाद्योः सकार
ककारयोर्लोपो भवति धातोर्ऊं सपरे नाम्नोर् रसपदान्तेच पुंस्तु । श्च
एवं विद्वस्शब्दः विद्वान् विद्वांसौ विद्वांसः हे विद्वन् विद्वांसं वि
द्वांसौ वसोर्वउः वसोः सेवंयिनो वकारस्य उत्वं प्राप्नोति शासादेश्च
रेपरे नह्वितेईपीकारेच विदुषः विदुषा वसोरसेद्ः वसस्त्वंसध्वंश्रस ह
अनडुहस्तेषां दत्वं भवति रसपदान्तेच विद्वद्भ्यां विद्वद्भिः विदु ५२

षे विद्वद्भ्यां विद्वद्भ्यः विदुषः विद्वद्भ्यां विद्वद्भ्यः विदुषः विदुषोः
विदुषाम् विदुषि विदुषोः विद्वत्सु आमंत्रणे हे विद्वन् हे विद्वांसौ
हे विद्वांसः सुवचसशब्दे तु अत्वसोः सावितिदीर्घः सुवचाः सुवच-
सौ सुवचसः सुवचसं सुवचसौ सुवचसः सुवचसा ससोर्विसर्गः
हवेइति उत्वे उत्वो सुवचोभ्यां सुवचोभिः सुवचसे सुवचोभ्यां सुव-
चोभ्यः सुवचसः सुवचोभ्यां सुवचोभ्यः सुवचसः सुवचसः सु-
वचसोः सुवचसां सुवचसि सुवचसोः सुवचस्सु आमंत्रणे हे
सुवचाः हे सुवचसौ हे सुवचसः एवं चंद्रमसशब्दः उशनसशब्द-

सा॰ ४३ हृस्वभेदः उशनसौ उशनसपुरुदंसामनेहस इत्येतेषां सेरयेडाः
भवति डकारष्टिलोपार्थः उशना उशनसौ उशनसः उशनसा
यौसंबोधनेनलोपोनवाश्वेतावावक्तव्यः हे उशनः हे उशन हे उशन॰
हे उशनसौ नू उशनसं उशनसौ उशनसः उशनसा उशनोभ्यां उशनोभिः
हे उशनसः उशनसे उशनोभ्यां उशनोभ्यः उशनसः उशनोभ्यां उशनोभ्यः
उशनसः उशनसोः उशनसां उशनसि उशनसोः उशनस्सु अ
नेहसो हे उशनः हे उशनसौ हे [illegible] अदसष्टाहृस्वभेदः त्यदा
देष्टेरितिसर्वत्राकारः अदसिइतिनिश्चिते सौसः सौपरे अदसोदका ४३

रसस्सत्वंभवति असौ अदसः सैरौकारादेशोभवति अमौद्विवचनेअ 61
दसौइतिस्थिते दसमः माहः उश्चऊश्च ऊः अदसोमकारादस्य
ह्रस्वस्यह्रस्वोकारोदीर्घस्यचदीर्घोकारोभवति अमूबहुवचनेसर्वा
दित्वाज्जसी अइए अमेइतिस्थिते एरीबहुत्वे बहुत्वेसतिअदस
एकारईकारोभवति अमी अमुं अमू अमून् मनेउत्वेचकृते टाना
स्त्रियां अमुना द्विवचने अद्रीम्यामेपश्चान्माहूकारः अमूभ्यां भि
सु भिस् एरीबहुत्वे अमीभिः अमुष्मै अमूभ्यां अमीभ्यः अमु
ष्मात् अमूभ्यां अमीभ्यः अमुष्य ङसिएत्वे अयादेशेचकृतेप

सा॰ श्चाउकारः अमुयोः अमीषां अमुष्मिन् अमुयोः अमीषु सामान्येऽप्य
४४ दसः कः स्यादिश्च सामान्येस्याधारणेऽर्थेवाच्येसति अदसः प्राक्टासरः
कः अमयोभवति सचस्यादिर्वन् यस्मादौ विभक्तौ तदेवकार्यं अमु
कः अमुकौ अमुके इत्यादि इति हसांताः ॥ अथ हसांतास्त्रीलिं
गाः प्रदर्श्यंते तत्र हकारांतः उपानह्शब्दः नहोधः नहोहकारस्य
धकारादेशो भवति रसेपदांते च उपानत् उपानद् उपानहौ उपा॰
नहः हे उपानत् हे उपानद् उपानहं उपानहौ उपानहः उपान
रुमेजवाः हा उपानद्भ्यां उपानद्भिः उपानहे उपानद्भ्यां उपानद्भ्यः उपानहः ४४

खसे चपा झसानां

उपानद्भ्यां उपानद्भ्यः उपानहः उपानहोः उपानहां उपानहि उपानहोः उपानत्सु वकारान्तो दिव्शब्दः दिव औसौ दिवश ब्दस्य वकारस्यौकारादेशो भवति सौ परे द्यौः दिवौ दिवः हे द्यौः वामि दिवो वकारस्य वा स्यात् अमि परे द्यां वा दिवं दिवौ दिवः उरसे दिवो वकारस्य रसे परे उः स्यात् द्युभ्यां द्युभिः रेफे नस्यानुस्वारो ह्रस्वे निसे बहुवचनान्तः त्रिचतुरोः स्त्रियां तिसृचतसृ स्वत् स्त्रियां वर्तमानयोः त्रिचतुरोः शब्दयोः तिसृचतसृ इत्येतावादेशौ भवतः ऋकारस्य ऋकारवत् ननस्तुराद्रुनम

सा॰ वति तिस्रः तिस्रः चतस्रः चतस्रः तिसृभिः चतसृभिः ति॰
४५ सृभ्यः चतसृभ्यः तिसृचतसृशब्दयोर्दीर्घो न भवति नामिपरे
तिसृणां चतसृणां ङेदस्मिन्वा तिसृचतसृशब्दयोः ङेदीर्घो
वा दीर्घो भवति नामिपरे तिसृणां चतसृणां तिसृषु चतसृ
षु रेफांतो गिर्शब्दः स्वोर्विहसे धातोरिकारोकारयोः दीर्घः
स्यात् रेफवकारयोः हसपरयोः गीः गिरौ गिरः गिरं गिरौ
गिरः गिरा गीर्भ्यां गीर्भिः गिरे गीर्भ्यां गीर्भ्यः गिरः गी
र्भ्यां गीर्भ्यः गिरः गिरोः गिरां गिरि गिरोः गीर्षु ग्रामेव्रणे ४५

हेगीः हेगिरौ हेगिरः एवंधुर्पुरादयोज्ञेयाः धकारांतः समि 65
धशब्दः वावसाने समित् समिद् [illegible] समिधौ [illegible] सः
मिधः समिधं समिधौ समिधः समिधा समिद्भ्यां समिद्भिः
समिधे समिद्भ्यां समिद्भ्यः समिधः समिद्भ्यां समिद्भ्यः स
मिधः समिधोः समिधां समिधि समिधोः समित्सु श्रामं
हे समिद् ने हे समित् हे समिधौ हे समिधः भकारांतः ककुप् ककुब् कुभौ ककुभः क
कुभं ककुभौ ककुभः ककुभा ककुब्भ्यां ककुब्भिः ककुभे
ककुब्भ्यां ककुब्भ्यः ककुभः ककुब्भ्यां ककुब्भ्यः ककुभः क
ककुभशब्दः ककुब् ३

ह्रे ककुब् ह्रे ककुप् ह्रे ककुभौ ह्रे ककुभः

सा॰ ङ्भ्योः ककुभां ककुभि ककुभोः ककुप्सु दकारान्तात्त्यदाद 66
५८ यः तेषां त्यदादेष्टेरः इति सर्वत्राकारे कृते स्त्व इति सत्वं आवन्तः
स्त्रियां अकारान्तान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भवति
पकारः सिलोपार्थः सवर्णे दीर्घः सह इति दीर्घे कृते स्त्रीलिं
गे सर्वत्राप्वद्रूपं नेयं स्या त्या त्याः त्यां त्ये त्याः त्यया त्याभ्यां
त्याभिः त्यस्यै त्याभ्यां त्याभ्यः त्यस्याः त्याभ्यां त्याभ्यः त्य
स्याः त्ययोः त्यासाम् त्यस्यां त्ययोः त्यासु सा ते ताः तां ते
ताः तया ताभ्यां ताभिः तस्यै ताभ्यां ताभ्यः तस्याः ताभ्यां ५८

ताभ्यः तस्याः तयोः तासां तस्यां तयोः तासु या ये याः यां
ये याः यया याभ्यां याभिः यस्यै याभ्यां याभ्यः यस्याः या
भ्यां याभ्यः यस्याः ययोः यासाम् यस्यां ययोः यासु ए
षा एते एताः एतां वा एनां एते वा एने एताः वा एनाः ए
तया वा एनया एताभ्यां एताभिः एतस्यै एताभ्यां एताभ्यः
एतस्याः एताभ्यां एताभ्यः एतस्याः एतयोः वा एनयोः ।
एतासाम् एतस्यां एतयोः वा एनयोः एतासु का के काः
कां के काः कया काभ्यां काभिः कस्यै काभ्यां काभ्यः ।

सा० कस्याः काभ्यां काभ्यः कस्याः कयोः कासाम् कस्यां कयोः कासु
४७ मकारान्त इदम्शब्दः इयंस्त्रियाम् इदंशब्दस्यस्त्रियांमिसहितस्यरू
पंभवति इयं इमे इमाः इमां एनाम् इमे एने इमाः एनाः
टीम्रोरे २६ अनदोसोः अनया एनया आभ्यां आभिः अस्यै आभ्यां आभ्यः
अस्याः आभ्यां आभ्यः अस्याः अनयोः एनयोः आसाम् अस्यां
अनयोः एनयोः आसु अथचकारान्तः त्वच्शब्दः चोःकुरिति
कुत्वे वावसाने त्वक् त्वग् त्वचौ त्वचः हेत्वक् हेत्वग् हेत्वचौ हे
त्वचः त्वचा त्वग्भ्यां त्वग्भिः त्वचे त्वग्भ्यां त्वग्भ्यः त्वचः त्वग्भ्यां त्व० ४७

त्वचं त्वचौ त्वचः

भ्यः त्वचः त्वचोः त्वचाम् त्वचि त्वचोः त्वक्षु एवंवाच्ऋच्प्रभृत·
यः पकारान्तअप्शब्दो नित्यंबहुवचनान्तः अप्जलम्इतिस्थिते स्व
म्नहृतोरिति दीर्घः आपः द्वितीयाबहुवचनेतुनदीर्घः अपः भिद्पा
भवति म् अप्शब्दस्यभकारेपरेदत्वं अद्भिः अद्भ्यः अद्भ्यः अपां अप्सु शकारा
न्तोदिश्शब्दः स्त्रीलिंगः दिशाकः दिश् दृश् स्पृश् मृश् पृश् उ
ष्णिह् ऋत्विज् दधृष् सृज् असृज् अनयुज् क्रुञ्च् इत्यादि नोरः
वेदस्थाने मेपदान्तेचकत्वंभवति दिक् दिग् दिशौ दिशः दिशं दिशौ
111. दिशः दिशा दिग्भ्याम् दिग्भिः दिशे दिग्भ्यो दिग्भ्यः दिशः

ऊभजवा

सा॰ दिग्भ्यो दिग्भ्यः दिशः दिशोः दिशाम् दिशि दिशोः दिक्षु हे दिक् 70
५८ हे दिग् हे दिशौ हे दिशः षकारांतः विष्शब्दः षो डः इति डः वाव
सानेइतिदः विट् विड् विषौ विषः विषं विषौ विषः विषा
षोडः विड्भ्यां विड्भिः विषे विड्भ्यां विड्भ्यः विषः विड्भ्यां विड्भ्यः वि-
षः विषोः विषाम् विषि विषोः विट्सु हे विट् हे विषौ हे विषः हे विड्
आशिष्शब्दः सजुष्शब्दवत् आशीः आशिषौ आशिषः हे आ-
शीः हे आशिषौ हे आशिषः आशिषं आशिषौ आशिषः आ-
शिषा आशीर्भ्यां आशीर्भिः आशिषे आशीर्भ्यां आशीर्भ्यः आ- ५८

शिषः आशीर्भ्यां आशीर्भिः आशिषः आशिषोः आशिषाम् आ॰ 71
शिषि आशिषोः आशीःषु स्त्रीलिंगत्वाददस्शब्दस्य सौ न विशेषः
असौ द्विवचनादौ त्यदाद्यत्वे टेरेकृते आवन्तः स्त्रियामित्यापू दीर्घे च
विभक्तिकार्य्यं च गौरी पश्चात् अमादेः इति दीर्घस्य दीर्घोकारः ह्रस्वस्य
ह्रस्व उकारः अमू अमूः अमूं अमू अमूः अमुया अमूभ्यां अमू-
अमू भ्यः भिः अमुष्यै अमूभ्याम् अमुष्याः अमूभ्यां अमूभ्यः अमुष्याः अ-
मुयोः अमूषाम् अमुष्याम् अमुयोः अमूषु इति हसांताः स्त्रीलि-
गाः अथ हसांताः नपुंसकलिंगाः तत्र रेफांतो नपुंसकलिंगो वार्

शाह्ः समासेऽक् वाः वारी अयमस्त्रि इति विशेषणात् नुं न भवति वारि २
पुनरप्येवं वारा वार्भ्यां वार्भिः वारे वार्भ्यां वार्भ्यः वारः वार्भ्यां वा
र्भ्यः वारः वारोः वाराम् वारि वारोः वार्षु॥ चतुर् शाब्दात् चतुरः
मेराचेत्याम् चत्वारि २ चतुर्भिः चतुर्भ्यः चतुर्भ्यः चतुर्णां चतुर्षु
नकारांतो अहन् शब्दः अह्नः सः अहन् शब्दस्य सकारः स्यात् रसेप
दांते च समासेऽक् स्वो विसर्गः अहः ईमौ वेङ्ग्राः अह्नी अहनी
अहानि २ अह्ना अरात्रिष्विति विशेषणात् रेफो भवति अहोभ्यां
अहोभिरित्यादि ब्रह्मन् शब्दः रसेपदांते च नलोपो वक्तव्यः ब्रह्म ४९

ब्रह्मणी ब्रह्माणि २ पुनरपि हे ब्रह्मन् हे ब्रह्मणी हे ब्रह्माणि ब्रह्म 7B
णा ब्रह्मभ्याम् ब्रह्मभिः ब्रह्मणे ब्रह्मभ्याम् ब्रह्मभ्यः ब्रह्मणः ब्र
ह्मभ्याम् ब्रह्मभ्यः ब्रह्मणः ब्रह्मणोः ब्रह्मणाम् ब्रह्मणि ब्रह्म
णोः ब्रह्मसु एवं कर्मन् धर्मन् चर्मन् प्रभृतयः नोनातामदंता
नो छंदसि ङि॰ सुपां वा लोपो वक्तव्यः परमे व्योमन् व्योम्नि वा पर्यायः
छंदस्यागमजानागमजयोर्लोपालोपौ वक्तव्यौ सर्वाभूतानि सर्वा नी
भूतानीति पर्य्यायः दीर्घेनानानिवर्त्तते मदादीनां स्थैमालुकिकृ
तेटत्वेन न भवति लकिनन निमित्तं वावसाने सद् त्यत् ते त्या

सा॰ नि पुनरप्येवं २ तद् तत् ते तानि पुनरप्येवं २ यद् यत् ये यानि पु
प॰ नरप्येवं २ किं के कानि पुनरप्येवं २ द्विवचनादौ टेरत्वे एतद् एत
एते त्॰ एतानि पुनरप्येवं २ एतद् एतद् एतत् एतत् एते एतेँ ए ए तानि
तानि पुनरप्येवं २ इदं इमे इमानि पुनरप्येवं २ तृतीयादौ तु स
र्वत्र पुंवत् चकारांतः प्रत्यच्शब्दः अचेरलोपो दीर्घश्च वोक्तः प्रत्य
क् प्रतीची प्रत्यञ्चि पुनरप्येवं प्रतीचा प्रत्यग्भ्याम् प्रत्यग्भिः प्र
तीचे प्रत्यग्भ्यां प्रत्यग्भ्यः प्रतीचः प्रत्यग्भ्याम् प्रत्यग्भ्यः प्रतीचः प्र
तीचोः प्रतीचाम् प्रतीचि प्रतीचोः प्रत्यक्षु हे प्रत्यक् हे प्रतीची ५॰

हे प्रत्यञ्चि जगत् जगती जगंति पुनरप्येवं २ महत्‌शब्दस्य भेदः 75

स्यात् महत इति दीर्घः महत् महती महांति पुनरप्येवं २ षकारां

ताश्चायुष् यजुष् सजुष् चक्षुष् वपुष् प्रभृतयः आयुः आयुषी आ

यूंषि पुनरप्येवं २ यजुः यजुषी यजूंषि पुनरप्येवं २ सकारां

ताः पयस् वचस् तेजस् वर्चस् प्रभृतयः पयः पयसी पयांसि पु-

नरप्येवं २ पयसः पयोभ्यां पयोभ्यः पयसः पयसोः पयसां ।

पयसि पयसोः पयस्सु हे पयः हे पयसी हे पयांसि अदस्‌शब्द

स्य स्यमोर्लुकिकृते सोर्विसर्गः अदः द्विवचनादौ टेरत्वेकृते 10

सा॰ मतोत्वमाह् अमुनी अमूनि ॥ पुनरप्येवं अदः अमू(नी) अमूनि शे 76
पा षेपुवत् नामिनःस्वरेइतित्वः अमुना अमूभ्यां अमीभिः अमु॰
ष्मै अमूभ्याम् अमीभ्यः अमुष्मात् अमूभ्यां अमीभ्यः अमुष्य
अमुयोः अमीषाम् अमुष्मिन् अमुयोः अमीषु इतिहसांतान
पुंसकलिंगाः अथेदानीयुष्मदस्मदोः स्वरूपंनिरूप्यते तयोश्च
वाच्यलिंगत्वात्रिषुलिंगेषुसमानंरूपं त्वमहंसिना सिसहि॰
तयोःयुष्मदस्मदोःत्वम् अहम् आदेशौभवतः यथासंख्येन त्व
म् अहम् युवावांद्विवचने युष्मदस्मदोःद्विवचनेपरेयुवआव॰ पा

आदेशौ भवतः आमौ युष्मदस्मदोः परः ङे आम् भवति युवाम्
आवाम् यूयंवयं जसा नसासहितयोः युष्मदोः यूयंवयं आदे
शौ भवतः यूयं वयं त्वन्मदेकत्वे एकत्वेगम्यमाने युष्मदस्मदोः
त्वत्मत् इत्येतावादेशौ भवतः अम्शौ युष्मदस्मदोः टे ानेसा
न् अमिसकारे भि सि भकारे च परे नौ मौ युवां आवां त्वदादेहे
शेष्वेत्वे कृते यासीति दीर्घः शसो नो वक्तव्यः युष्मान् अस्मान् त्व
त्वन्मदादेशे कृते एटाङ्योः युष्मदस्मदोः टेरेत्वं भवति टाङि
इत्येतयोः परयोः यादेशः त्वया मया युवाभ्यां आवाभ्यां

सा॰ युष्माभिः अस्माभिः तुभ्यमह्येङया ङयां सहितयोः युष्मदस्मदोः 78
प२ तुभ्यं मह्ये इत्येतावादेशौ भवतः तुभ्यं मह्यं युवाभ्याम् आवाभ्याम्
भ्यस् भ्यम् युष्मदस्मदोः परे भ्यस् भ्यं भवति आकारो भकारा॰
दित्यादृत्यर्थः तेनात्वे नेनभवतः युष्मभ्यं अस्मभ्यं ङसिभ्य॰
सोः स्तुः पंचम्याः ङसिभ्यसोः स्तुर्भवति आकारः सर्वादेशार्थः
उकारः उच्चारणार्थः त्वत् मत् युवाभ्याम् आवाभ्याम् युष्मत् अ
स्मत् तवमम ङसा ङसां सहितयोः युष्मदस्मदोः तवमम इ॰
त्येतावादेशौ भवतः तवमम युवयोः आवयोः युष्माकं यु प२

मदादीनां देश भावः

ष्मदस्मदोः परः साम आकम भवति युष्माकम् अस्माकम् त्वयि म 79

यि युवयोः आवयोः युष्मासु अस्मासु अथानयोरादेशविशेषविधि

र्निरूप्यते युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयाभिस्तेमेवानौवस्नसौ

युष्मदस्मदोर्यथासंख्येनामी आदेशाभवंति कीदृशयोःषष्ठी चतुः

र्थीद्वितीयाभिःसहितयोः तत्रैकवचने ते मे द्विवच

तव ने वांनौ बहुवचने वस्नसौ स्वामीतेंसममायातःस्वामी मेंसोप्रत मम

युष्मभ्यं गतः नमस्तेंभगवन्भूयोदेहिमेंमोत्तमदतये स्वामीवांसजद्दासोस्त्व युवयोः

ईड्वानौंदानयाचनाम् राजावांदास्यनेदानेंज्ञानेनोंमधुसूदनः

आवयोः मह्यं युवाभ्यां आवाभ्यां

युवां १=　　　आवां १=　　　युष्माकं १=

सा १　अस्मा(पद)कं २=

देवोवांमवताद्दिह्युष्मान्नरकान्नौजनार्दनः स्वामीवोंबलवान्वाजास्वा
मीनोंसौजनार्दनः ३ नमोवोंब्रह्मविद्भ्योज्ञानंनोंदीयतांधनम्
स्वानेदास्यैः प्रपश्यामः पश्यध्वंनैः सदखिलः त्वामामा अस्मास
हितयोर्युष्मदस्मदोस्त्वामाइत्येतावादेशौभवतः पश्यामित्वांमद्
मां लीढंपश्यमांमदभेदकम् पश्यामित्वांजगत्पूज्यंपश्यमांजगतो
पतिम् १ नादौ पादादौवर्तमानयोर्युष्मदस्मदोर्नैतेआदेशा
भवंति नवयेपात्रवोराजन्ममनेष्यतिशाश्वतः नवमित्राणित्रिया
निसुर्ममित्राणितान्यपि १ सवोयनपरादग्रेनभवंतिवसा

अस्मभ्यं २=
युष्मभ्यं २=
युष्मान् २=
अस्मान् २=
त्वां
त्वां मां
पद

४ रुद्रोविश्वेश्वरोदेवोयुष्माकंकुलदेवता सएवभगवाञ्शंभुरस्माकंपापनाशनः २४

81

द्यः देवास्मान्पाहि नृहरे विश्वोस्मात्त्वत्सर्ववेदा हे रामनवदासो
स्मि रामतुभ्यंनमोनमः ५ पादादावि[illegible]निकिम् पांतुवो
नरसिंहस्यनखलांगलकोटयः हिरण्यकशिपोर्वक्षःक्षेत्रासृ
क्कर्दमारुणाः चादिभिश्च चादिरपियोगेनैते आदेशाभवे
ति युष्माकं अस्माकंच चादिर्निपातः चवा ह अह एव
एवम् नूनम् पृथक् स्वस्ति अस्ति दोषा मृषा मिथ्या मिथ
स् अथ अथो त्वमस्वम् उच्चैस् नीचैस् स्वर् अंतर् प्रातर्
भूयस् अहो स्वित् सह साकम् समम् सत्रा सार्द्धम् अं

सा॰ ५४ नरा नमस् अलम् कृतम् अमा नो ना ईषत् किल खल्वै 82
आरात् मृषाम् यत् तत् स्वराश्च इत्येवमादि गणो निपात
संज्ञो भवति तत्रादिविभक्त्यर्थे निपात्यते तस्मिन्निति तत्र य
स्मिन्निति यत्र कस्मिन्निति [illegible] कुत्र [illegible] तस्मिन् काले तदा
यस्मिन् काले यदा कस्मिन् काले कदा एकदा अन्यदा तेन प्रका
रेण तथा येन प्रकारेण यथा कथम् इत्थम् तस्मादिति ततः यतः
कुतः अतः इतः सार्वविभक्तिकस्तस् इत्येके पूर्वस्मिन्निति
पूर्वतः पुरस्तात् अयस्मिन्निति पुरस्तात् अयस्तात् प॰ २४
स्मात् एकस्मादिति ए॰

कृतः परस्मिन्पूर्वेपरस्तात् आहिचदूरे दूरेर्थेवाच्येआहिप्रत 83
योभवति इहिलाह्विवक्षेतिवोउत्ताः किमःसामान्येचिदादिः
कश्चित् कश्चन क्वचित् क्वचन नदर्थीनकार्त्स्न्येयोर्वासात् रा
जसात् भस्मसात् गुर्वधीनेधने गुरुसात् उर्युरर्थ्यंगीकरणे
उरीकृत्य उररीकृत्य सद्यआदिरद्यकालेनिपात्यते सद्यः सप
दि अधुना इदानीं सांप्रतं तूर्णं शीघ्रं आशुसंप्रति पूर्वेद्युः
अन्येद्युः अपरेद्युः यदि यर्हि झटिति अलंप्रादिरुपसर्गाः
प्र [illegible] अप सं अनु अव निर् दुर् वि आङ् अधि अपि अ

सा॰ ति सु उत् अभि प्रति परि उप प्रादुस् अंतर् आविः अयंगण
५५ उपसर्गसंज्ञोभवति प्राग्धातोरुपसर्गाः धातोःप्राक्प्रयोक्तव्याः
तदव्यये नदिदंवादिशब्दरूपमव्ययंस्यात् क्त्वायंतेव क्त्वाप्रत्य
यांतेचाव्ययसंज्ञंभवति क्त्वा कृत्वा गत्वा क्यप् तुम् णं डाच् व
त् आम् कृतम् शस् इतिक्त्वादयः अव्ययाद्धि भक्तेर्लुक् अव्य
यात्परस्याविभक्तेः लुग्भवति नशब्दनिर्देशो अव्ययानांवचनं
लिंगादिनियमः उच्चैःकुलम् उच्चैः स्त्री उच्चैःकुले उच्चैश्च स
दृशंत्रिषुलिंगेषु सर्वासुचविभक्तिषु वचनेषुचसर्वेषुयन्नव्ये ५५

ति तद्वाच्यम् उक्तान्यलिंगान्यव्ययानि अधुनालिंगविशेषविधि 85
विज्ञापयिषया स्त्रीप्रत्ययाः प्रस्तूयंते आवंतः स्त्रियाम् आकारो
ऽन्तोऽस्य स्त्रियो वर्त्तमानात् टाप् प्रत्ययो भवति जाया माया मेधा
श्रद्धा धारा इत्यादि अजादेश्चापि वक्तव्यः अजा एडका कोकि
ला शूद्रा बाला गणिका काप्यतः कापि इश्चातः स्त्रियोका
पि परे पूर्वस्याकारस्येकारादेशो भवति कारिका पाचिका पा
ठिका वष्टिभागुरिर्ल्लोपमवाप्योरुपसर्गयोः आपं चैव हलंतानां
यथा वाचा निशा दिशा अवगाहः वगाहः अपिधानं पिधा

सा॰ ने ह्रस्वो वा स्त्रियां क्वापि परे नद्यादेश्च पूर्वस्य ह्रस्वो वा भवति वेणि
५८ का वेणीका नदिका नदीका श्रेयसितरा श्रेयसीतरा नौकाः
दौ ह्रस्वो न भवति वाग्रहणादियं विवक्षा निपातस्यानेकेष्वर्थेषु वृ
त्तिर्निपातानामनेकार्थत्वात् उक्तंच यातश्च श्चोपसर्गाश्च नि
पाताश्चेति ते त्रयः अनेकार्था हि विज्ञेयाः पाठस्तेषां निदर्शनं
न्वणईप् नकारान्तात् ऋदन्तात् अणन्तात् स्त्रियामीप्प्रत्ययो भव
ति दण्डिनी दन्तिनी करिणी हस्तिनी मालिनी ईपि राज्ञो लो
पो वक्तव्यः राज्ञी शुनी कर्त्री अयमवी ऋकारान्तान्मातृष्वसा ५८

86

देवीश्वनभवति यस्यलोपः इष्ठ्यश्चस्त्ययः नस्यलोपोभवति स्वरेय 87
कारेचपरे ॐगवी षिद्गतः षकारटकारउकारऋकारान्तुबेया
च्चस्त्रियांईप्रत्ययःस्यात् ष वराकी ट कुरुचरी उगोमती ऋपचंती
भवंती पठंती इत्यादि नद्यादेः नदादेर्गणात्स्त्रियामीप्रत्ययःस्यात्
नदी मही गौरी गोतमी चतुर्थी पंचमी इंद्रादेरानीप् इंद्रा
देर्गणात्स्त्रियामानीप्रत्ययःस्यात् इंद्राणी भवानी रुद्राणी
णी ब्रह्मा मृडानी वरुणानी शर्वाणी मातुलादेर्वा मातुलोपा
ध्यायतस्त्रियांवाच्यमूर्याद्वाआनीप्रत्ययोभवति मातुलानी

सा· मातुली उपाध्यायानी उपाध्यायी क्षत्रियाणी क्षत्रिया आचार्यानी 88
५० आचार्या ईपसमाहारेगुणेषु त्रयाणांसमाहारः त्रयी द्वयी पुंयो
गेच शूद्रीगणकी चकारात्झोपालिकादीन जातेरयोपधात् जा
तिवाचिनोयकारोपधादकारान्तात् स्त्रियामीप्रत्ययास्यात् मेषी
सूकरी हंसी कुक्कुटी ब्राह्मणी अयकारोपधात्किं क्षत्रिया वै·
श्या आर्या प्रथमवयोवाचिनोईपूर्वक्तव्यः कुमारी किशोरी त
कलमीइत्यादि प्रथमग्रहणात्किं वृद्धा स्थविरा अकुग्रहणात्किं
शिशुः कमारोतिष्ठः कन्या स्वाङ्गाद्वा दीर्घपुच्छी दीर्घपुच्छा सो ५०

गाद्वा स्वांगाद्वा॥ स्त्रियांवाईप्रस्यात् सुमुखी सुमुखा सस्तनी स-
स्तना नतंगी नतंगा मृगाक्षीतिसिद्धे पद्मवदनादित्यादौ वा ग्रह-
णान्न भवति अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमविकारजं अतत्स्थं त-
त्र दृष्टं च तेन चेत्तत्तथा युतं कृदिकारादक्तेरीप्र्वा वक्तव्यः अंगुली
अंगुलिः धूली धूलिः आजिः आजी अक्तेरितिविशेषणात् कृ-
तिः भूतिः धृतिः मतिः ऐचमन्वादेः मन्वादेर्गणात् स्त्रियामीङ्
प्रस्यात् ऐकारादेशश्च मनायी वृषायी वृषाकपायी अग्ना-
यी चकारान्मनोरौ वा मनावी पत्यादयो निपात्यन्ते पत्नी अ-

सा॰ नर्वर्ती सखी अशिश्वी अ र्द्धजरती युवती प्राची प्रतीची इ
५८ त्यादयः दार शद्वोनित्यंपुंल्लिंगोवहुवचनांतः दाराः दारान्
दारैरित्यादि वैरंगणान् उकारांतान्गुणवाचिनः स्त्रियांवाई
प्स्यात् पट्वी पटुः मृद्वी मृदुः तन्वी तनुः ऋज्वी ऋजुः उत
ऊः उकारांतानऊप्रत्ययःस्यात् पंगूः वामोरूः सूतस्त्रिः युव
नशद्वात्तिप्रत्ययःस्यात् युवतिः एभ्योनामवान्त्यादयः स्त्रा
वंतादापइतिसेर्लोपः ईवंतान्हसेपइतिसेर्लोपः पूर्ववत्क्रि
या १ (अथाविभक्तयानरूपेन लिंगार्थेप्रथमा यानप्रयय) ५८

ॐ अथविभक्त्यर्थोनिरूप्यते लिंगार्थेप्रथमा यात्तप्रत्ययायति
रिक्तमर्थवस्तुस्वरूपंलिंगं तस्मिन्नेवमन्मात्रेर्थेप्रथमाविभक्तिर्भव॰
ति लिंगादयोपिप्रथमार्थाइतिकेचित् तत्सङ्ख्यालिंगपरिमा
णवचनानि कुसः स्त्रीः ज्ञानेपरिमाणे खारीद्रोणः आढकं॰
वचने एकः द्वौ बहवः रविविराजतेराजारोषात्कुमारी॰
रोदपिते वोभुज्यतेभुवंभूपालःग्रामग्रासोरामलक्ष्मणौ मन
सिवचसिकायेतुनयपीयूषपूर्णाः त्रिभुवनमुपकारश्रेणि
भिःप्रीणयंतःपरगुणपरमाणून्पर्वतीकृत्यनिजहृदिवि निसं॰

सा· लसेनः सेतिसेनः कियेनः ऊमाराः श्वारेनेस्वरंरोरूपंनेचनार
काः जेगीयेनेचगीतज्ञाः मेन्त्रीयेनेहजाजिताः श्रामेत्रणेव
५८ श्रामेत्रणेभिस्तुविकरणे ऽर्थेप्रथमाविभक्तिर्भवति मोसमुद्ध
रगोविंदप्रसीदपरमेश्वर ऊमारोस्वरमासाथात्तमर्येभान
वस्विनः मोसः [illegible] मोस भगोस अघोस
इत्येतेशाहानिपातांनेयिविधेयेत्नमस्तमोडुनराध्यभगोस्तुभे
नमोस्तुने अथोक्षमोमहाप्राज्ञयानयाचोः सज्वस्वरंघोषाः ५५
कार्येकर्तृसाधनयोर्दानपात्रेविस्लेषावयोसंबेयश्चापारभाव·

योः शेषाषष्ठ्विभक्त्या द्वितीयाप्या पञ्चार्थेषु भवंति कार्थेक
मेकारके उत्पाद्येप्राप्ये संस्कार्ये विकार्ये च द्वितीया विभक्ति
र्भवति कटंकरोति कांकारूपं पश्यति वाक्षणः गंस्पृशा
प्नोति पर्सिंहः सोमंसुनोति सोमपाः अभिसर्वतसोः का
यात्रिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितां तेषु ततोन्यत्रापि द
श्यते अभितो ग्रामे नदी वहति सर्वतो नगरं नरवोदृश्यंते धि
गेस्वदत्तं षु रोहितमुपर्युपरि याचकाः पतंति व्याप्यमध्याधि
गृत्राप्यावेति नगरमयोयो निर्याने दृश्यंते समयाग्रामे शत्रु

93

मा· हेतः निकषाग्रामे शुभे प्रामे [illegible] यदभूताभाविनडुला 94
घेयस्मिंस्तमेवप्राप्यतेतत् आण्यत्रगुणायानमूलापाकृषि·
५५ णेवाक्रियतेतत् संस्कार्ययत्रपूर्वावस्थापरित्यागेनावस्थान्त
प्राप्तिक्रियतेतद्विकार्यं यदाकर्तेरिप्रथमास्यात्कर्मणिद्वि·
पा तीयतदा यदाकर्तरितृतीयास्यात् कर्मणिप्रथमातदा का·
लाध्वनोर्नैरंतर्य्ये नैरंतर्य्येकालाध्ववाचिभ्योव्याप्तावुप·
रिद्वितीयाकार्या मासमधीते क्रोशंपर्वतः अत्यन्तयोमास·
मद्विरधीते क्रोशस्यैकदेशेपर्वतः कर्तरिप्रयानेक्रियाश्र ५५

येसाधनेन क्रियासिद्ध्युपकारके करणेऽर्थे तृतीया विभक्तिर्भव
ति भिन्नः शरेण रामेण रावणो लोकरावणः करायेण विदी
र्णोपि वानरैर्युध्यतेऽत्र नः साध्यतेऽनेन इति साधनं साधनं द्वि
विधं बाह्यमाभ्यंतरं च शरीराभिन्नेन दात्रेण दन्यतु वा लोमन।
साहरिं स्मरति रथेन द्वारकां गच्छति १ दानपात्रे संप्रदान का
रके चतुर्थी वेदविदे गां ददाति दानं किमुच्यते दीयते इति दा
नेऽत्र स्वत्वः रजकस्य वस्त्रं प्रदत्वा ननाय ददाति न दानं भवेत् न
हि स्वस्वत्वपरित्यागः परस्वत्वोत्पादनं च दानं ज्ञायकत्वाद।

स

दाति सम्यक्श्रेयोबुद्ध्या प्रदीयते यस्मै तत्संप्रदानं कथ्यते कवींद्रैः
नविषया केवलया तपसा वापि पात्रता यत्र हूतयमेवाभतद्धि

पात्रं प्रकीर्तितं विश्लेषावधौ पंचमी विश्लेषो विभागस्तत्र योवधि
श्चलनया अचलनया वा विवक्षितस्तत्रापादाने पंचमी विभक्ति
र्भवति यस्माद्विभागो जायते सोवधिः यावतोश्वादपतत् भूभृ
तोऽवतरति गंगा संबंधे षष्ठी भेद्यभेदकयोः श्लिष्टः संबंधोऽत्रो
च्यते द्विष्ठो यद्यपि संबंधः षष्ठ्युत्पत्तिस्तु भेदकात् राज्ञः सपु
रुषो ज्ञेयः पित्रोरेतत्सृजते गुरूणां वचने पथ्यं कवीनां रसवद्व

वः आधारेसप्तमी आधारोधिकरणं षड्विधमधिकरणं औप-
श्लेषिकं १ सामीपिकं २ अभिव्यापकं ३ वैषयिकं ४ नैमि-
त्तिकं ५ औपचारिकं ६ चेति कटेशेतेऊमासेमीवटेगावः
सुशेरते तिलेषुविद्यतेतैलं हृदिब्रह्मामृतेपरे युद्धेसंनह्य-
ते पीरोगुल्मेग्रकरिणांशते भावेसप्तमीभावः क्रियालक्षणं
तत्रापिसप्तमीययाक्रियया क्रियान्तरंलक्ष्यतेतत् क्रियालक्षणं
भावः वर्षतिदेवेचौरआयातः पतत्यंशुमालिनिपतितोरतिः
कालेपिसप्तमीवसन्तेकोकिलास्वरंकरोति अथउपपदविभ-

सा॰ कार्योति तृप्येते विना सह न मनुते निर्धारणे साम्यादिभिस्त्रयपै 98
रपि योगे द्वितीयादयः षड् भक्तयो भवंति विना पापं सर्वं फल
६२ ति अंतरेण हरिं एणी किं जीवितेन अंतरेणास्मामधुरित्यादि पदा॰
द्राव सह सहरेश साकं सार्द्धं समं इत्यादि योगे तृतीया सह शि
ष्येण गतो गुरुः सहरा श्वेतो मैत्रेण साकं नयनाभ्यां अश्रु त्यक्षणा॰
देता: सार्द्धं पतिभिर्धनं साधुः समं चन्द्रेणो दिनो गुरुः सहा॰
र्थे गम्यमाने सह योगे विना पितृतीया वृद्धो यूना समायातीत्या ६२
दि: नमः स्वस्ति स्वाहा स्वधालं वषट् योगे चतुर्थी नमो नारायणा॰

99

णाय सविताग्नेसोमायस्वाहा पितृभ्यःस्वधाअलंमल्लोमल्लाय
इन्द्रायवषट् ऋतेथ्यादियोगेपंचमी ऋतेज्ञानान्नमुक्तिः ऋतेयो
गेद्वितीयापिज्ञानमृतेविनायोगेतृतीयापि ज्ञानेनऋतेमुक्ति
र्व्रध्न्योगृहाद्विहारः निर्द्धारणेषष्ठीनिर्द्धारणेक्रियागुणजा
तिभिः समुदायात्पृथक्करणेनषष्ठी क्रियापराणामध्येभ
गवदाराधकःश्रेष्ठः गवांकृष्णासंपन्नक्षीरा एतेषांद्दवियःशू
रतमः स्वाम्यादियोगेषष्ठीसप्तमीचगवांस्वामी गोषुस्वामी
गवांधिपतिः गोष्वधिपतिः कर्तृकर्मयोरक्तादौकृति

सा० ष्ठीकर्तरिकार्ये चषष्ठीविभक्तिर्भवति क्तादिवर्त्तिते कृदंते श 100
ब्दे प्रयुज्यमाने व्यासस्य कृति भारतस्य श्रवणं सूनौ च कार्ये स
६२ तौ यामौ प्रयुज्यमाने कार्ये षष्ठी विभक्तिर्भवति चकाराद्धितौ
याप्यमातुः स्मरति मातरं स्मरति हेतौ तृतीया पंचमी च वक्त
व्या फलमायतनयोर्गेणाहेतुः नित्यः शब्दः आकाशगुणत्वात् पर
ममहत्परिमाणवत् इति वादिनं मीमांसकं प्रति नैयायिकः शा
ह अनित्यः शब्दः कृतकत्वेन कृतकत्वात् चाभयहेतौ पंचमी । ६२
चौराद्बिभेति व्याघ्रात्त्रस्यति विद्युत्पातात्त्रकितः षष्ठीहेतुप्रयो

गे हेतुप्रयोगे सति षष्ठी विभक्तिर्भवति कस्य हेतोरियं कन्या
अन्नस्य हेतोर्वसति इत्थंभावे तृतीया अन्यस्यान्योपचारेण लक्ष
णं इत्थंभावः तस्मिन्नित्थंभावे तृतीया विभक्तिर्भवति शिखा
पुत्रेण पश्यति संसारमसारेण येनांगविकारः येन विकृतो
गेनांगिनोंगविकारो लक्ष्यते तस्मादंगात्तृतीया विभक्तिर्भवति
अक्ष्णा काणः पादेन खंजः करणेन वधिरः शिरसा खल्वाटः
जनिकर्तुः प्रकृतिः जायमानस्य कार्यस्योपादानमपादानसं
ज्ञं भवति तस्यापादाने पंचमी यस्मात्प्रजाः प्रजायंते तद्ब्रह्म

निविडर्द्धुणाः आङादियोगे पंचमी आपाटलिपुत्रात् वृष्टो देवः आ
दिशाब्दात् अबधपूर्णरिणैरपियोगेपि तादर्थ्ये चतुर्थी च वक्तव्या
तस्मै कार्याय इदं कार्यं तादर्थ्ये संयमाय श्रुतं धत्ते नरो धर्माय सं॰
यमं धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये क्रुधादियोगे च॰
तुर्थी कृष्णाय क्रुध्यति मित्राय द्रुह्यति गुणवते असूयते काश्र॰
लोपे कर्मण्यपि करणे च पंचमी वक्तव्या कावयोर्दर्शने यत्र का
वेतानैव दर्शनेन सम्बन्धात् ल्यप् लोपः स्यादिति प्रोक्तं मनीषिभिः
हर्म्यात् प्रेक्षते हर्म्यमारुह्य प्रेक्षते इत्यर्थः आसनात् प्रेक्षते आसन॰ ९३

102

त्रे उपविष्टे प्रवृत्तेते ऽस्मर्थः निमित्तात्कर्मयोगे सप्तमी च वक्तव्या 103
चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरं केशेषु चमरीं हन्ति सीम्नि
पुष्कलको हतः विषये च विषयेऽर्थे सप्तमी विभक्तिर्भवति तर्केव
बुः षष्ठी सप्तम्यौ चानादरे बहूनां क्रोशतो गतश्चौरः बहुषु स
पुत्रवत्स्वपि स्वयमार्येण याति साधुमार्गेण मातापित्रोः रुद
तोः प्रव्रजति पुत्रः अन्योक्तप्रथमा यदि कार्यं तदा यमेनाख्याते
नक्तुतावोक्ते भवति तदा प्रथमा प्रयोक्तव्या यदा क्रियते पं
टः कार्यं छेदः स्मिस्यादिः सर्वत्र दध्ना जुहोति धुनेत्वबलस्य

104

सा॰ स्मृतिः बुजनीर्विरेजुः कर्ताकर्मचकरणंचसंप्रदानंतथैवच अ
पादानाधिकरणमित्याहुः कारकाणिषट् इतिकारकप्रक्रिया
६३ अथार्थवद्विभक्तिविधिप्रष्टानां पदानां समासोनिरूप्यते विभज्य
तेपृक् शक्ति तेक

६४

नेकर्मधारयेऽपि पा[illegible]साविभक्तिः समासस्थानेयेनाम्नो नाऽ 105
म्नामनयोर्योगपत्वेसत्येवसमासोभवति यथाश्वातद्धितोपि तऽ
द्धितसमासयोर्विभक्तिसहितयोर्नामत्वे ततोभार्यापुरुषयो
स्तादैनभवति परस्परसंबंधाभावात् सच समासः षड्विधः
द्विगुस्तत्पुरुषो द्वंद्वः कर्मधारय एव च बहुव्रीहिरव्ययीभावः
समासाः षट्प्रकीर्तिताः पूर्वपदप्रधानोऽव्ययीभावः परपद
प्रधानौ द्विगुतत्पुरुषौ उभयपदप्रधानौ कर्म्मधारयद्वंद्वौ
अन्यपदप्रधानो बहुव्रीहिः तत्रक्रियासन्निधानादुभयपद

सा॰
६४

प्रधानो बलवान् ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्र- 106
योजनं स्त्रीश्रिय इति स्थिते स्त्रीशब्दाद्द्वितीयैकवचने श्रम् स्त्रिय-
मधिकृत्येति विग्रहे अन्वययोग्यार्थसमर्थकः पदसमुदायो
विग्रहो वाक्यमिति यावत् कृते समासेऽव्ययस्य पूर्वनिपातो व-
क्तव्यः पूर्वेऽव्ययेऽव्ययीभावः अव्यये पूर्वपदे सति योन्वयः सोऽव्य-
यीभावसंज्ञकः स्यात् समाससंज्ञायाम् समासप्रत्यययोः लुक् स-
मासे वर्तमानायाः विभक्तेः प्रत्यये च परे लुक् स्यात् इत्यमोर्लु-
क् निमित्ताभावे नैमित्तिकस्याप्यभावः कृत्तद्धितसमासेनाम- ६४

ते नामसंज्ञायां स्यादिर्विभक्तिः अधिस्त्रीसि इति स्थिते सनपुं 107
सके सोव्ययीभावो नपुंसकलिंगः स्यात् नपुंसकाद्ध्रस्वत्वे अव्य
यीभावात् अव्ययीभावात्परस्या विभक्तेर्लुग्भवति अधिस्त्रि ग
हकार्ये रायमतिक्रांते अतिरिकुले नावमतिक्रांते अतिनु
जले ह्रस्वादेशे सत्युत्तराणामिकारोकारौ वक्तव्यौ यथासादृ
श्ये यथाशब्दो सादृश्ये वर्तमानः समस्यते सोव्ययीभावसंज्ञकः
समासः स्यात् शक्तिमनतिक्रम्य करोतीति यथाशक्ति अतोम
न्ततः अकारांतादव्ययीभावात्परस्या विभक्तेरम् स्यात् अनेप

सा॰ वर्जनेवर्ज्जयित्वा कुंभस्यसमीपेउपकुंभंवर्त्तते उपकुंभंपश्य वा
८५ टाङ्योः टाङि॰इ॰पितयोः अम्भावात् उपकुंभंकृतं उपकुंभेनकृ
तं उपकुंभंस्थापय उपकुंभंस्थापय अनतइतिविशेषणात्पंच
म्यानभवति उपकुंभादानय अवधारणार्थेयावतिच अवधार
णार्थेयावच्छब्देप्रयुज्यमानेअव्ययीभावसंज्ञकः समासोभवति
यावंत्यमत्राणिसंभवंति तावंतोब्राह्मणानामंत्रयस्वेति याव
दमत्रं [illegible] मक्षिकाणामभावोनिर्मक्षिकंवर्त्तते पारेम
ध्ये षष्ठ्यावा गंगायाः [illegible] पारेगंगं गंगायामध्येगंगं अमादे ८५

तत्पुरुषः द्वितीयैयंते [illegible] पदेसतितत्पुरुषसमासःस्यात् ग्रामे
प्राप्तः ग्रामप्राप्तः दात्रेणछिन्नः दात्रछिन्नः यूपायदारुः यूप-
दारुः वृकेभ्योभयं वृकभयं राज्ञःपुरुषः राजपुरुषः अक्षेषु-
शौंडः अक्षशौंडः क्वचिदमायेनस्यत्वपरत्वे अग्नेआहितः आ-
हिताग्निः पूर्वंभूतः भूतपूर्वः समासेक्वचिदेकपदंयेणह्नुः शा- त्व ५
राणेवणे शरवणे आम्राणेवने आम्रवणे त्रीणिनयनानियः-
स्य त्रिनयनः पानस्यवा पानशाह्नस्यनकारस्यणकारोवाभ-
वति सुरायाःपाने सुरापाणे सुरापाने नञि नञिपूर्वपदे-

सा° सतियोनञः सतञ्चतत्वःस्यात् समासेसतिनञअकारादेशोभ°
९९ वति नाकादिवर्जे नब्राह्मणः अब्राह्मणः नविद्यते अकंदुःख
यस्मिन्सनाकः नखनक्षत्रनपुंसकनक्षत्रमित्यादौनभवति अत्
स्वरेसमासेसतिनञः अनादेशोभवति स्वरेपरे अश्वादन्यः अन
श्वः धर्मविरुद्धः अधर्मः ग्रहणाभावः अग्रहणमिति तद
न्यतद्विरुद्धतदभावेषुनञ्वर्तते चार्थेद्वंद्वः समुच्चयान्वाच°
येतरेतरयोगसमाहाराश्चार्थाः नचेश्वरं गुरुंचभजस्वेतिप्र°
त्येकमेकक्रियापदसंबंधे समुच्चयेसमासोनास्ति परस्पर ९९
वटोभिक्षामट गांचानयेति क्रमेणक्रियाद्वयसंबंधे अन्वाचये समासोनास्ति।

मसंबंधात् इतरेतरयोगसमाहारेचार्थे द्वंद्वसमासोभवति
द्वंद्वेअल्पस्वरप्रधानेकारोकारांतानांपूर्वनिपातोवक्तव्यः पटुश्च
गुप्तश्चपटुगुप्तौचकार उक्तार्थानामप्रयोगः अग्निश्चमारुतश्च
अग्निमारुतौभोक्ताचभोगश्च भोक्तृभोगौयवश्चखदिरश्च य
वखदिरौ इत्यादि देवताद्वंद्वे पूर्वपदस्यदीर्घोवक्तव्यः अग्निश्च
सोमश्च अग्नीषोमौ इंद्रश्चबृहस्पतिश्च इंद्राबृहस्पती अग्न्या
देःसोमादीनांसस्यषत्वंवक्तव्यं इतरेतरयोगेद्विवचनं एक
वद्भावोवासमाहारेवक्तव्यः धवाश्चखदिराश्चपलाशाश्च

112

सा॰ शाखाङ्कशापलाशाः शाखाङ्कशापलाशं अस्यादीनां विभक्तिलोपश्च
६७ नेपूर्वपदस्य सकारागमो वक्तव्यः अस्मोनंपरस्येरएकाने द्विगुद्वंद्वौ
एकनेववर्तमानौ द्विगुद्वंद्वौ नपुंसकलिंगौ भवतः संख्यापूर्
वो द्विगुः संख्यापूर्वो द्विगुःसमासोभवति समाहारेऽनईघ
द्विगुः समाहारेऽर्थे द्विगुःसमासोभवति ततअकारांतादीप्प्र
त्ययोभवति दशानांग्रामाणांसमाहारः दशग्रामी पंचानांअ
ग्नीनांसमाहारः पंचाग्निः पंचानांगवांसमाहारः पंचगुः न ६७
पुंसकत्वात्ह्रस्वत्वं त्रयाणांफलानांसमाहारः त्रिफली त्रिफ

लेतिहरितः पात्रादीनामीषत्प्रतिषेधोवक्तव्यः पंचानांपात्राणांसमा
माहारःपंचपात्रंत्रिभुवनेचतुर्युगमित्यादिः बहुव्रीहिरन्यार्थेप्र
थमपदार्थेप्रधानोयः सबहुव्रीहिसंज्ञकःसमासोभवति बहु
धनेयस्य सबहुधनः यस्यप्रधानस्यैकदेशोविशेषणत्वेना
यत्रज्ञायतेनसतद्गुणसंविज्ञानोबहुव्रीहिः लंबोकर्णोयस्यसलंब
कर्णः बहुव्रीहौविशेषणसप्तम्यंतयोःपूर्वनिपातोवक्तव्यः क
रेथनेयस्यसकरथनः नेहादिभ्यस्तुइहादिभ्यःपरस्यसप्तम्यंतस्य
पूर्वनिपातोनभवति इंडपोलवः कपिध्वजः चक्रपाणिः प

सा॰ प्रजाभिः प्रजामेधयोरसुक् स्वष्टुप्रजायस्यससस्वष्टुप्रजाः दुष्टामेधायस्य 114
९७ सदुर्मेधाः धर्मादन् धर्मशब्दादनप्रत्ययोभवति स्वष्टुधर्मोयस्यसस
धर्मा रूपवतीभार्यायस्यासौरूपवद्भार्यः समार्थे स्त्रीलिंगस्यात्मार्थे
वर्तमानस्यह्रस्वोभवति पुंवद्वासमासेसतिसमानाधिकरणे पूर्वस्यस्त्री
पा शब्दस्यपुंवद्भावोभवति पुंवद्भावादीपोनिवृत्तिः रम्याभार्यायस्यासौरम्य
वागरूणातं भार्यः कल्याणीप्रियइत्यादौनभवति गोः गोशब्दस्यसमार्थेवर्तमान
स्यह्रस्वोभवति पंचगावोयस्यपंचगुः संख्यासुख्याद्यादिपूर्वस्य पादशब्द
स्याल्लोपोवक्तव्यः सहस्रपादाःयस्यासौसहस्रपात् शोभनौपादौयस्य ९८
स्यासौसुपात् व्याघ्रपातन्यस्मादोपरे पादशब्दस्यपदादेशोभवति द्विपदः
द्विपदा सहस्रपदः सहस्रपदा सहस्रपद्भ्यां सहस्रपद्भिः इत्यादिनह्रस्वादेः ह्रस्वादेःपरस्यपादस्य
ह्रस्वाकारस्यलोपोनास्ति

हस्तिपादः

[illegible]पादः हस्तिनः पादाविव पादौ यस्य सः [illegible] 115

[illegible] टङकाः

समासे सति टक्अडकण् ने प्रत्ययाः स्युः यथाप्रयोगमनुसंधेयं

टकारस्तत्पुरुषे ज्ञेयो अकारो द्वंद्व एव च ककारस्तु बहुव्रीहौ

डकारः सर्वतोमतः अचिंत्यो महिमा यस्य स अचिंत्यमहिमः

नो वा नोनस्य पदस्यांते लोपो वा भवति यकारे स्वरे च परे वा अ

हृणात् क्वचिन्न भवति उपधालोपश्च अक्ष्णोमध्यं मध्याक्षः

कवीनां राजा कविराजः टकारोनुबंधः ईवर्थः कविराज्ञी

सा॰ राज्ञः पुरं राजपुरं वाकर्मनसश्चवाङ्मनसे दक्षिणस्यादिशिपे
८८ श्याः दक्षिणपूर्वाः अहश्चरात्रिश्च अहोरात्रं द्वौचत्रयश्चद्वित्राः
वृ॰ बहूकर्त्तारोयस्यसः बहुकर्तृकः प्रासादः बहवोराजानोयस्यां
जा॰ नगर्य्यांसाबहुराजनगरी अजटेर्लोपेकृते प्रावृताः स्त्रियो इ
तिबहुव्रीहिः कर्मधारयस्तत्सार्थे पदद्वयेनत्सार्थे एकार्थे
निष्पन्नेसतिसमासः कर्मधारयसंज्ञोभवति नीलंवनउत्पलंवनी
लोत्पले रक्ताश्वासौलतारक्तलता पुमांश्चासौकोकिलश्चपुं
स्कोकिलः पुंसः खपेसंयोगान्तस्यलोपोवक्तव्यः नान्तस्तु ८८

तामसमासः प्रादेरुपसर्गस्यनाम्नश्च कृदंतेनसहसमासःसतत्पुरु
षोभवति सचामाद्येतत्राभावेपिंतत्पुरुषसंज्ञकः प्रकृष्टोवादः
प्रवादः कुंभंकरोतिकुंभकारः सहादेःसादिः समासेसतिसहा
दीनांसादिर्भवति पुत्रेणसहागतःसपुत्रः क्वचिन्नयथासह
चरः सहसेतिरसोसध्रिसमितिरयः सह सम तिरस इमेः
तेषांसध्रिसमितितिरिइत्येतेआदेशाःस्युः सहांचतीतिसध्र्यङ्
समञ्चतीतिसम्यङ् तिरोंचतीतितिर्यङ् कोःकत् कुषाढ्वः
स्यतत्पुरुषेसमासेस्वरेपरेकद्भवति कुत्सितेर्थे कदन्नं इष.

सा०
९९

दृश्येकदादिः ऊषाहृस्य ईखदृश्येवर्त्तमानस्यकत्तकाकवड्स्येनेआ 118
देशाभवति कडस्सेकोस्से कबोस्से लवणेका कालवणे ष्ठुस्ष्ठे
वा ऊषुरुषः काषुरुषः षषडदोडश्च षषुउत्वेदयोर्डोदेतस्याद
त्तुषषुइत्यस्यउः दस्यउत्वेचभवति षट्चदशाच षोडश षट्प्र
काराद्यस्यसः षोढा संख्यायाः प्रकारेण षोडन् दंतस्यदत्तुषस्य
उत्वे नवर्गस्यसः वृहतांपतिः वृहस्पतिः महेश्वरः महतन्नैश्वर
कारः समानाधिकरणेदिवोद्यावाभूमौ द्यावाभूमी द्यावापृ०
थिव्यौ जायाचपतिश्चजंपती महतीमायामहामाया इत्या ९९

दिष्वाकृतिगणोयं लक्ष्मसुहृत्प्रपलक्षणप्रभृतिः अलुकक्वचि
त् क्वचित्समासेकृतेतद्धितेपिविभक्तेरलुकभवति कुष्ठा॰
न्मुक्तः स्तोकान्मुक्तः अप्सुयोनिरस्येति अप्सुयोनिः उरसि॰
लोमा हृदिस्पृक् कण्ठेकालः वाचोयुक्तिः दिशोदण्डः पश्यतो
हरः इत्यादि तद्धितेपिसमानाधिकरणेशाकपार्थिवादीनां॰
मध्यपदलोपोवक्तव्यः शाकप्रियश्चासौपार्थिवः शाकपार्थि
वः देवपूजकोब्राह्मणः देवब्राह्मणः देवानांप्रियइतिमू॰
र्खेनिपात्यते आदेश्चद्वंद्वे द्वंद्वसमासेआदिपदस्यक्वचिल्लो

सा॰ पःस्मात् वकाराद्विकल्पोपिक्वचित् मातावपितावतौपि 120

७॰ तरौ श्वश्रूश्वशुरश्चतौ श्वशुरौ दुहिताचपुत्रश्चतौपुत्रौ

ऋतोद्वंद्वे द्वंद्वेपूर्वपदस्याकारोवक्तव्यः मातावपितावतौ

मातापितरौ द्वंद्वेसर्वादिनाज्ञसी वर्णाश्रमेतरे वर्णाश्र

मेतराः वैयधिकरणेवहुव्रीहौमध्यमपदलोपश्च भिन्ना

र्थेनिष्टत्वेभिन्नविभक्तिकत्वेवैयधिकरणे गेयादेरिः गेया

देरिःप्रत्ययोभवति उपमानाच्च उपमानात् गेयशब्दात् इ

प्रत्ययोभवति स्त्रीचेत्कुमुदगेया कुमुदस्यगेयइवगेयो ७॰

यस्यसक्तुमुद्गौपि: हंसस्यगामनंइवगामनंयस्याःसाहंसगा
मना दिक्संख्येसंज्ञायाम् दिक्शब्दाःसंख्याशब्दाःसंज्ञायांविष
येपरपदतुल्यार्थैःसमस्येते ससमासः नन्दरूपःस्यात् अविग्र
होनित्यसमासस्वमस्वस्वपदविग्रहोपि दक्षिणाग्निः सप्तर्षि
मा इतिसमासप्रक्रियासमाप्ता ॥ अथतद्धितानिरूप्यन्ते अ
पत्येण नाम्नोपत्येर्थेण प्रत्ययोभवति उपगोरपत्यमितिवा
क्ये उपगोरण इतिस्थिते समासप्रत्यययोरितिषष्ठीलोपः
णकारोवृद्ध्यर्थः आदिस्वरस्यञ्णितिचवृद्धिः स्वराणांमध्ये

सा० यश्चादिस्वरस्तस्य वृद्धिर्भवति ञिति णिति च तद्धिते प्रत्यये परतः। 122
७१ उकारस्यौकारो वृद्धिः वोत्वस्वरे उकारस्यौकारस्य च अव् भवति
स्वरे णकारे च परे औपगवः वासिष्ठः गौतमस्यापत्यं गौतमः
भारद्वाजः शैवादिभ्यस्त्वनिवत्कव्यः शैवः वैदेहः कुत्सस्यापत्यं
कौत्सः ऋउरणि मातृपादस्य ऋकारस्य उर् स्यात् अणि परे के
चिन्कसानोज माद्रष्टव्याः संमामातृणामपत्यं सामातुरः
द्वैमातुरः त्रैमातुरः अनडुहनन्तेः अकारेणनाम्नो नान्तविशेः
ह्रादणस्येर्ष्येजप्रत्ययः स्यात् जकारो वृद्ध्यर्थः यस्य लोपः दे ७१
३

वदन्नस्यापत्यं वैदन्निः श्वैपरिः दापारथ्यिः पुंदरस्यापत्यं पौ
रंदरिः वक्कादेश्वेनत्वमत्वः वाहोरपत्यं वाहविः उपबाहोरप
त्यं औपबाहविः [illegible] औपबिंदविः एणाय[illegible]णेयस्त्रीः
यायागीनडादिस्त्रीपितृष्वस्रादेः गर्गादेः नडादेः श्वस्रादेश्च स्त्रीः
लिंगात्पितृष्वस्रादेश्च एण् ञायण् ण्यण् णी यञ्च्येते प्रत्ययाः
स्युः अपत्येऽर्थे गर्गस्यापत्यं गार्ग्यः वत्सस्यापत्यं वात्स्यः नडस्या
पत्यं नाडायनः अत्रेरपत्यं आत्रेयः नियेरपत्यं नैयेयः कापेरप
त्यं कापेयः वियेरपत्यं वैयेयः गंगाया अपत्यं गांगेयः मस्त्रा

ए यण्‌ प्रते यस्यलोपः ए यण्‌ प्रते

मा॰ अपत्ये माहेयः पितृष्वस्रपत्ये पैतृष्वस्रीयः मातुः स्वसा मातृष्व
७२ सा मातृष्वस्रपत्ये मातृष्वस्रीयः मातृपितृभ्यां डामहच् मातुः
पितृभ्यां डामहच् प्रत्ययः स्यात् मातुः पिता मातामहः पितुः पि॰
ता पितामहः क्वचित् स्त्रीलिंगादपि भूमेरपत्ये भौमः लग्व
डुत्वे क्वचित् अपत्येर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचिद्
क्विविषये लुग्भवति वसिष्ठस्यापत्यानि वसिष्ठाः गार्गाः वत्साः
अत्रेरपत्यानि अत्रयः विदेहस्यापत्यानि विदेहाः लौकिकनत
न्निमित्ते देवत्वेदमर्थे देवतार्थे इदमर्थे चोक्ताः प्रत्ययाः स्युः॰ ७२

इंद्रो देवता यस्येति ऐंद्रं हविः सोमो देवता यस्येति सौम्यं देवतार्थे
इदं देवस्येदं दैवतं क्वचिद्‌द्वयोः क्वचित्सर्वेषां नरपदयोः द्वयोर्वृद्धिः स्या एप्रते
त् आग्निमारुतं कर्म सुहृदो भावः सौहार्दं सौभाग्यं सुयाद्यादे॰
उकिण सुपान्नस्यापत्ये सौपान्नकिः व्यासस्यापत्ये वैयासकिः
णिनो वा उक्ताः प्रत्यया विषयोनेर्णिनोस्तुः अजो गोर्यस्यासौ वा
गोः अजगुः शिवः तस्येदं यत्तु राजंगवं अजगवं वा उपमानाच्च उप॰
मानात्परो गोर्यश्चाहः तस्मादिकारस्यात्ययो भवति भवति ऊरुदः
स्यगोपदवगोयायस्यासौ ऊरुदगोपिः तस्यापत्येस्त्रीचेत्तनिको।

अश्लमते वोष्वप्नवे

एपप्रते प स्यलोपः आवतः स्त्रियाम् आपः

आए प्रते वो व स्व २ ऽस्य व

ते ईयप्रते

126

सा॰ मुदगेभ्य आग्रयणः आग्रयणस्यायं आग्रयणो ग्रामः विसोविदेवे

७३ स्यैव गोपवनस्यायं गोपावनात्पयसः षाह्राज्ययन्नमयः स्यात् गो

विदंगवे ऊले भवे ऊल्ये तदीये मदीये वतरस्य लोपायेयो वत

रशाह्वायईयदस्यैनौ यन्नयो स्तः तुर्यः तुरीयः वतरस्याहस्यव

कारस्यलोपश्च अन्यस्यदकः अन्यपाद्रस्यदगागमः स्यात् णीयश्च

स्वे यस्ये परे अन्यदस्मदीये अर्थजरत्णादेदं अर्थजरतीये आवतः

स्त्रियां आपः डित्तामह्रयस्यलोपः दक्षिणपश्चात्पुरसः त्यः

ए दक्षिणभवः दाक्षिणात्यः पश्चात्भवः पाश्चात्यः पुरोभः ७३

ईयप्रते

वः पौरस्त्यः कारकाद्धिमात्युक्ते कारकादपि एते प्रत्ययाः स्युः
क्रियायुक्ते कर्तरि कर्मणि चाभिधेये ऊँ ऊमेवरक्ते कौऊमे म
थुरायाआगतः माथुरः ग्रामेभवः ग्राम्यः धुरंवहति धुर्यः
धौरेयः धुरीणः कंवलेनावृतोरथः कांवलः वस्त्रेणावृतो
रथः वास्त्रः केनेयकाः कईनइयइक इत्येते प्रत्यया भवंति
भवाद्यर्थे वुणित्वे चैषां विकल्पेन णित्वे वेति वा ग्रहणादेव
कर्णाटे भवः कार्णाटकः कर्णाटको वा ग्रामादागतस्तत्र
जातो वा ग्रामीणः समीचीनः तिरश्चीनः यलोपश्चा णा

सा॰ दीप्रत्ययेक्कवित् कन्यायांभवः कानीनः पुंश्रेणाद्युक्ता[illegible]पौ

नत्रभवःपौष्णीण्णः२ ं समासीपौषी तत्रेभवः तात्रियः इंद्रियं शुक्रियं अस्तैदी॰

पतीन्याद्विकः शाह्नेऊ शालः शाह्निकः नर्केचनरस्कार्किकः

वैदिकी सनतो किमादेरखादेर्भवार्थेयेसनोप्रत्ययोभवतः न

ऊतस्मः नचनः अयनतनः ह्यस्तनः स्वस्तनः सदातनः स्वा॰

र्थेपि उक्ताः प्रत्ययास्वार्थेपिभवंति देवदत्तएवदैवदत्तकः

चत्वारएववर्णाः चातुर्वर्ण्यं चौरएवचौरः अव्ययसर्वनाम्ना

मक[illegible]च्प्राकटेः उच्चैर्भवे उच्चकैः नीचैर्भवेनीचकैःत्व ७४

129

याप्येवमयकामया एवमयकाशालायांभवः शालकः अणी
नयोर्युष्मदस्मदोस्तवकादिः अणीनयोः परयोःयुष्मदस्मदो
स्तवकाद्यादेशाभवंति नचैकवचनेनवकममकौ वहुवच
चने यौष्माकौ आस्माकौ तावके मामके तावकीनः मा
मकीनः यौष्माकः आस्माकः यौष्माकीनः आस्माकीनः व
तुले साहृश्येर्थे वत्प्रत्ययाभवति चैत्रवन्मैत्रे घटवत् पट
वत् भावेनत्वयणः शब्दस्यप्रवृत्तिनिमित्तंभावःतस्मिन्भा
वेनत्वयणाइत्येतेप्रत्ययाभवंति ब्राह्मणस्यभावोब्राह्मणता

सा॰ नोनस्यनिमेस्त्रीलिंगत्वाद्दाप् समाहारेनावचेत्रेर्गुणः चेता जनता
७५ ब्राह्मणेन ब्राह्मण्यं सौमनस्यं सौभाग्यं वैदुष्यं कर्म्मणि च
[illegible]वक्तव्यः ब्राह्मणस्येदं कर्म्म ब्राह्मण्यं राज्ञ इदं कर्म्म राजन्यं ग॰
ज्ञ नोवेतिलोपः स्वरे यकारे च परे लोहितादेर्डिदिमन् लो
हिता देर्भावे इमन्प्रत्ययो भवति सचडित् लोहितिमा अणि
मा कालिमा लघिमा ऋर इमति हसादेर्लघोर्ऋकारस्य रेफो
देशो भवति इमनादौ प्रत्यये परे प्रथिमा म्रदिमा बहोर्भो
वइतिविग्रहे बहोर्लोपो भू च बहोः बहोरुत्तरेषामिमनाः ७५

वृतोनप्र न्समप्रहृत्वोद्योदीघः श्राच सपोगात्त

ल्लोपः हृसेपः
ल्लोपः
131

दीनामिकारस्यलोपोभवति बहोःस्थानेभूवादेशः भूमा अ
स्त्यर्थेमतुः नाम्ना मतुप्रत्ययोभवति अस्यास्मिन्वाऽस्तीत्ये
तस्मिन्नर्थे उकारोनुमविधानार्थः गोमान् गोमती श्रीमान्
श्रीमती अद्रकौचमतर्थे वैजयंतः प्रासाद वैजयंतीपताका
अस्याःस्तीति वैजयंतिकः मायाअस्यास्तीति मानोपधाइ वि
नो मकारोनात्सकारोनोपधादकारोनादकारोपधाचवतिनो
प्रत्ययोभवतोऽस्त्यर्थेः पंचानुपनीऊजीदंडी हृषहतीभूमिः
किंवास्यामी तडिदादिभ्यश्च तडित्वान् पतत्कि पतञ्जाःपरि

वैजयंतः वैजयंतिकः प्रासाद

मायिकः

न

सा॰ माणेवतुः परिमाणेऽर्थेवतुः प्रत्ययोभवति यत्तदो ए यत्त॰
७८ दोष्टेतानंभवति वतोपरे किमःकियेश्च किमःकियादेशोभ
वतिवतोर्वकारस्ययकारः यावान् तावान् कियान् श्राद्द॰
स्वैतदेवा एतावान् इयान् तंदादेरिलः तेदिलः फतिलः
[illegible] अत्रमेदंताडरः देतरः श्रद्दादेर्लः श्रद्दालः दया
लुः कृपालुः श्रस्मायामेधाश्रग्भ्योऽस्त्यर्थेविनिर्वक्तव्यः तप
३ नां शै सै च स्वी मायावीमेधावी श्रग्वी वाचोग्मिन् वाग्मी श्रालाटोऽ
ना म्नो नोत्नाप श घो क्तिनभाषिणि वाचाटः वाचालः ईषदपरिसमाप्तौकल्पदे ७८

पटुदेशीयाः ईषदपरिसमाप्तः सर्वज्ञः सर्वकल्पः पटुदे
शीयः कविदेशीयः प्रशंसायां रूपः प्रशस्तो वैयाकरणो
रूपः भूतपूर्वे चरट् दृष्टचरी प्राचुर्यविकारप्राधान्यादिषु
मयट् अन्नमयो यज्ञः मृन्मयो घटः स्त्रीमयो जाल्मः अश्म
नमयश्चंद्रः तदधीतेवेदवेत्यर्थाण्वक्तव्यः व्याकरणमधीते
वेद वा वैयाकरणः सौभनोऽश्वः स्वश्वः वेदेति सौवश्वः न
सेपियौ ऽपुरटच सेपिजौ यौ सेपियौ तयोः सेपिजयोर्यकार
वकारयोः सेवेपिनः स्वरस्य वृद्धिर्न भवति किंतु तयोर्वृद्धा

तेर

सा॰ ७७

134

गमोभवति इट्वउट्वइत्येतावागमौभवतः वसोर्विश्वैवेकृ
त्वायकारात्पूर्वमिकारः वकारात्पूर्वमुकारः पश्चादादिस्वर
स्यजिगाति इतोज्ञानार्थे लजितः तूषितः तुपितः तरतमे
यसिष्ठाःप्रकर्षे अतिशयेर्थेतरतमईयसुइष्ठ इत्येतेप्रत्यया
भवंति शुक्लतरः शुक्लतमः कृसतरः कृसतमः ईयसिष्ठौ
डिन्नौवक्तव्यौ टिलोपः उकारोनुबंधविधानार्थः नस्महतइति
दीर्घः अतिशयेनलघुर्लघीयान् पापीयान् लघीयसी पा
पीयसी लघिष्ठः पापिष्ठः गुर्वादेरिष्ठेमेयस्सु गुर्वादेर्गरा ७७

दिरादेशोभवति इष्ठेमेयस्सुपरेषु गणादिषुलोपश्च अति
शयेनगुरुःगरीयान् गरिष्ठः गरिमा(अतिशयेनप्रियः) प्रि
यशब्दस्यप्रआदेशोभवति प्रेष्ठः प्रेयान् प्रेयसी स्थूलशब्द
स्य स्थ वा आदेशोभवति स्थविष्ठः स्थवीयान् स्थेमा स्थवी
यसी ईलोपोज्याशब्दादीयसः ज्याशब्दात्परस्येयसईकारस्य
लोपोभवति अतिशयेनवृद्धोज्यायान् ज्येष्ठः अतिशयेन
दीर्घो द्राघीयान् द्राघिष्ठः प्रशस्यस्यश्रः प्रशस्यशब्दस्य
श्रआदेशः अतिशयेनप्रशस्यः श्रेयान् श्रेष्ठः बहोरिष्ठेभिः

सा॰ बहोरन्तस्येकारस्य यिरादेशो भवति बहोर्भूश्च भूयिष्ठः भूया 136
७८ न् विन्मन्तन् तृप्रत्ययानां नेलोपश्श्रेष्ठादौ अतिशायेन कर्त्ता
करिष्ठः इत्यादि प्रयोगवशात् किमोव्ययादाख्यातात्तरत
मयोराम्वक्तव्यः ऊतस्तरां परमाणवः ऊतस्तमां नेषामारभ
कत्वे उच्चैस्तरां गायति पचतितरां पठतितमां परिमाणे द
घ्नादयः परिमाणेर्थे दघ्नट् मात्रट् द्वयसट् इत्येते प्रत्यया भव
न्ति जानुदघ्नं जलं शिरोद्वयसं पुरुषमात्रं द्वयोर्बहूनां चैक
स्य निर्द्धारणे क्रियमाणे किमादिभ्यो वा डतरडतमौ वक्तव्यौ ७८

कतरोभवतोः काख्वः कतमोभवतांतात्रिकः भवतोर्थेनर॰ 136
स्तार्थिकस्तनरउत्रूह्लन्त संख्येयविशेषणावधारणे द्वितस्था
त्रूभ्यांतीयः द्वितीयः त्रेः संप्रसारणे तृतीयः षट्चतुरोस्थट्
षष्ठः चतुर्थः पंचादेर्मः पंचमः सप्तमः एकादशादेर्डः ए
कादशः विंशत्यादेर्वातमट् विंशतितमः विंशतितमी॰
विंशः शतादेर्वातमट् पूरणेशततमः शततमी कतिकति
पयाभ्योघ्यट्कतिथः कतिपयथः संख्यायाःप्रकारेधाद्विधा
त्रिधा षोढा गुणेणवा द्वेधा त्रेधा द्वैधं त्रैधं क्रियायाअ॰

सा॰ ७२

एकोकृत्वस् पंचकृत्वः द्वित्रिभ्यांतुः द्विशः त्रिशः बह्वादेः
प्रास् बहुशः स्तोकशः अल्पशः तयायडौ संख्यायाः द्विती
यं त्रितीयं द्वयं त्रयं द्वितयी त्रितयी द्वयी त्रयी शेषा निपा
त्याः कत्यादयः इति तद्धितप्रक्रिया समाप्ता प्रथमवृत्तिः
समाप्ता आचार्यपूर्वार्द्धं संपूर्णम् शुभमस्तु सर्वजगताम् ॥
कल्याणमस्तु ॥ संवत् १९०३ ॥

138

727

७२

A.C. Joshi Library
P.U. Chandigarh

MSS No. 727 (Part - 4) Subject Vyakarna

Name of MSS Saraswat Parkirya (Upsarg Sangak)

Author Swarupacharya

Period ______ Folios 5

Script Devnagiri Source Prof. M. Rakesh, D.A.V. College. Jalandhar

Missing Folios ______

१ र्थे मंगलारंभयोश्च अर्थांतरकथने तम् गानदिनार्थे श्वस् आगामि-
दिनार्थे उच्चैः उच्चत्ववाचकः अतिशयार्थवाचकश्च एवं उच्चकैरपि
नीचकैः नीचत्वार्थे स्वरस्वरणार्थे अंतर् मध्ये प्रातः प्रभाते पुनर्भू-
यस् एतौ द्वौ यौनःपुण्ये सह सहार्थे अंतरेण विनार्थे अंतराम-
ध्यार्थे अलं भूषायां निवारणे पर्याप्तौ समर्थे च कृते निवारणे प्र-
णार्थे च अप्रमानोना एतेच नाः प्रतिषेधार्थे ईषत् स्तोकार्थे ईषार्थे-
व भृशं अत्यर्थे हयान हरार्थे यतः यस्मात्कारणात् इत्येवंचादिग-
णो निपातसंज्ञको भवति स्वरश्च अआइईउऊऋॠऌॡएऐओऔ १

2

ॐ चादिर्निपातः चादिर्गणोनिपातसंज्ञकोभवति च पुनरर्थेसमु
च्चयादिषुच वा विकल्पार्थेउपमानार्थेच हअह इतिहैखेदार्थे
पादपूर्णार्थेच अहह इत्यपि खेदे आश्चर्येच एव निश्चयार्थेऔ
पम्येच एवं अनेनाप्रकारेणअंगीकरणेच पूर्वोक्तस्मरणेउपमा॰
येच नूनं निश्चये पृथक् भिन्नार्थे विना अभावार्थे वर्जनार्थेच
नाना बहुप्रकारवाची नामइति कोमलामंत्रणेसंभावनायांच अ
